## न्यायमतरीत्या कालः

भास्करभट्टः जोशि

“चिदचित्कालनात्कालः गुणैरात्मनि चेदृशै”[1] इति, “कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः इति[2]”, कालः सृजति भूतानि कालः संहरति प्रजाः”। कलनात्सर्वभूतानां स कालः परिकीर्तितः। इति च श्रूयते लोके।

इत्थमपि-

अतीतो पटः इति, भविष्यति वर्षा इति, वर्तते घटः इति च व्यवहाराः लोके दृष्टाः। व्यवहारो नाम शब्दप्रयोगः। वर्तते, अतीतः, भविष्यति इति शब्दानां च अर्थ एव कालः।
अत एव उक्तम्- “अतीतादिव्यवहारहेतुः कालः”[3] इति।

मुक्तावल्यां कालस्य निरूपणम् इत्थम्-

“जन्यानां जनकः कालो जगतामाश्रयो मतः"[4] इति

जन्यानां कार्याणां निमित्तकारणं यः सैव कालः। कार्यमात्रं प्रति कालः न समवायिकारणं, नापि असमवायिकारणं द्रव्यत्वात्। अतः एव कार्याणां प्रति कालः निमित्तकारणमेव भवति। अत्र प्रश्नः, कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किं प्रमाणम्? इति चेत् उच्यते, “तदुत्पत्त्यधिकरणस्य तदुत्पत्तिहेतुत्वं, तदुत्पत्तिहेतोश्च तद्धेतुत्वमिति” नियम एव प्रमाणम्।

---

[1] निरुक्तिः। [2] भ. गीता। ११-३२ [3] तर्कसंग्रहः [4] मुक्तावली- का. सं- ४५, प्रत्यक्षखण्डः, पृ सं-१५०

अस्तु कालस्य अस्तित्वे किं प्रमाणम्? इति चेत् "जगतामाश्रयो मतः" इति। सर्वपदार्थानाम् आश्रयः कालः इति। एवं च "कालः कालिकेन सर्ववानिति" प्रतीत्या सर्वाधिकरणत्वेन कालाख्यद्रव्यसिद्धिरित्याशयः।

अस्मिन्नेव विषये काचित् अज्ञातकर्तृकेन विरचितमातृका प्राप्ता। अस्याः मातृकायाः विवरणम् इत्थम्-

कर्ता - अज्ञातकर्तृकम्।
लिपिः - तेलगुलिपिः।
लिप्यासनम् - कागजपत्रम्
पुटानि - ४ पुटानि, १४ पङ्क्यः।
प्राप्तस्थानम् - अडियार् लय्ब्ररी, चैन्नै।
क्र. सं - १५९०

एतादृश्याः मातृकायाः सम्पादनं विहितमस्ति। अस्यां मातृकायां ये दोषाः आसन् ते वारिताः। सुबोधाय तत्र तत्र कानिचन पदानि वाक्येषु कल्पितानि। [] अनेन चिह्नेन तानि पदानि सूचितानि।{} अनेन चिह्नेन मातृकायां विद्यमानः पाठः प्रदर्शितः।

॥श्रीहयवदनाय नमः॥

जगदाधारः काल इति प्राञ्चः। तच्चिंत्यम्। कालस्य जगदाधारत्वे मानाभावात्। न चेदानीं जगदिति प्रतीत्या जगदाधारत्वं सिद्धमिति [वाच्यम्]। तादृशप्रतीतेः कालजगतोः सम्बन्धविषयकत्वेनतदधिकरणत्वविषयत्वाभावात्। अन्यथा कालस्य सर्वाधारत्वे घटत्वपटत्वाद्यधिकरणत्वेन घटपटादिशब्दवाच्यत्वप्रसङ्गात्। तत्पद-

प्रवृत्तिनिमित्ताधिकरणत्वस्य तत्पदवाच्यत्वप्रयोजकत्वात्। {इति} [न च] समवायेन तत्पदप्रवृत्तिनिमित्ताधिकरणत्वं तत्पदवाच्यत्वे प्रयोजकं, न तु तत्पदप्रवृत्तिनिमित्ताधिकरणत्वमात्रं, अतो न दोष इति वाच्यम्। एवं सति समवायादीनां समवायपदवाच्यत्वानुपपत्तेः। समवायेन समवायत्वाद्यनधिकरणत्वात्।

न च तथापि जगदाधारतानिर्वाहकसम्बन्धातिरिक्तसम्बन्धेन तत्पद-प्रवृत्तिनिमित्ताधिकरणत्वं तत्पदवाच्यत्वे प्रयोजकम्। अतो न समवायस्य समवायपदवाच्यत्वानुपपत्तिः। जगदाधारतानिर्वाहक-सम्बन्धातिरिक्तस्वरूपसम्बन्धेन समवायत्वाधिकरणत्वात्। नापि कालस्य घटादिपदवाच्यत्वापत्तिः। जगदाधारतानिर्वाहक-सम्बन्धेनैव घटत्वपटत्वाधिकरणत्वादिति वाच्यम्। एवं सति भूतलादीनामपि घटादिपदवाच्यत्वप्रसङ्गात्, स्वसंयुक्तसमवायसम्बन्धेन घटत्वा-धिकरणत्वात् कालस्यापि कालपदवाच्यत्वानुपपत्तिः। जगदाधारता-निर्वाहकसम्बन्धे नैव तस्य कालत्वाधिकरणतया तद्भिन्नसम्बन्धेन तदनधिकरणत्वात्।

नच काले कालत्वस्य जगदाधारतानिर्वाहकसम्बन्धातिरिक्तसम्बन्धेनापि प्रवृत्तिरस्ति इति न तस्य तत्पद{पर}वाच्यत्वानुपपत्तिरिति वाच्यम्। प्रमाणाभावादेकत्रैव एकस्य सम्बन्धद्वयेन{प्र}वृत्तेः क्वाप्यदर्शनाच्च। तथात्वे कालसम्बन्धस्य स्वरूपसम्बन्धत्वानुपपत्तिश्च। सम्बन्धा-न्तरमन्तरा विशिष्टप्रत्ययजनकत्वस्याभावात्। तस्मात् स्वावच्छेदक-सम्बन्धेन प्रवृत्तिनिमित्ताधिकरणत्वमेव तत्पदवाच्यत्वप्रयोजकमिति कालस्य जगदाधारत्वे [स्वावच्छेदकसम्बन्धेन जगदाधारत्वात् घटादिशब्दवाच्यत्वापत्तिः।]

अपि च कालस्य सर्वाधारत्वे कार्यकारणभाव एव लोके दुर्ग्रहः स्यात्। अतिप्रसक्तत्वेन तादृशावच्छेदकधर्माभावात्। समवायेन अनतिप्रसक्तत्वविवक्षायां च प्रमेयत्वादेरप्यवच्छेदकत्वाप्रसङ्गात्। कालिकासम्बन्धातिरिक्तसम्बन्धेन अनतिप्रसक्तित्वविवक्षायां च कालत्वस्याप्यनतिप्रसक्तत्वापातात्।

किञ्च कालस्य सर्वाधारत्वेऽवृत्तिपदार्थो{भेद}भावप्रसङ्गात्। सर्वस्यापि तद्वृत्तित्वावश्यकत्वात्। नच तद्भिन्नसर्वाधारत्वमेव कालस्य तद्घटित-सर्वाधारत्वमिति न तदवृत्ति{त्व}पदार्थो{वभेद}भावप्रसङ्ग इति वाच्यम्। विनिगमकाभावात्। प्रतीतेरुभयत्राप्यविशेषात्। तस्मात् कालस्य सर्वाधारत्वसम्भवेन तत्प्रतीतेस्तत्सम्बन्धमात्रविषयत्वमङ्गी-करणीयम्। न तत्सम्बन्ध[व]त्वेन च तदधिकरणत्वं सिध्यति। अतिप्रसङ्गात्।

अपि च सर्वाधारत्वं महाकालस्य क्षणलवादिकालस्य वा। नाद्यः। इदानीमिति प्रतीतेः क्षणकालविषयत्वेन महाकालविषयकत्वाभावात्। अन्यथा इदानीं घट इति प्रतीतेः घटेप्यसाधनज्ञानत्वेन घटप्रत्य-यानापत्तेः। तद्घटज्ञानस्य महाकालविषयत्वेन एतत्कालावच्छिन्न-त्वरूपवर्तमानत्वावगाहित्वाभावेन विषयसत्तारूपनिश्चयत्वाभावात्। न द्वितीय्यः। इदानीं कालस्य क्षणरूपस्य क्षणान्तरकालीनपदार्थान्त-रानधिकरणत्वात् इदानीं कालस्य घटतदभावोभयाधिकरणत्वे इदानीं काले घटो नास्तीत्यापत्तेश्च त[त्प]दवाच्यत्वापत्तिः दुर्वारैव।

किञ्च कालस्य सर्वाधिकरणत्वे सर्वाधिकरणत्ववर्णनमेव निष्प्रमाणं स्यात्। काले सर्वाधिकरणत्वस्येव तदभावाधिकरणत्वस्यापि सत्वेन

सर्वाधिकरणत्वप्रतीतेः तदभाववति तद्विशेष्यकभ्रमरूपत्वात् । नच न तदभाववति तद्विषयकत्वमात्रं न भ्रमत्वं तथा सति अव्याप्यवृत्तिसंयोगादिप्रतीतेः भ्रमत्वापातात् । किन्तु प्रतियोग्यसमानाधिकरणतदभाववति तद्विषयकत्वम् । तथाच काले सर्वाधिकरणत्वप्रतीतेः प्रतियोगिसमानाधिकरणसर्वाधिकरणत्वाभाववति सर्वाधिकरणत्वविषयकत्वेन तादृशविशिष्टस्यैव असत्वान्न भ्रमत्वमिति वाच्यम् । कालस्य सर्वाधिकरणत्वं वावदतो तव मते प्रतियोग्यसमानाधिकरणाप्रसिध्या लक्षणाप्रसिद्धिस्स्यात् । न च कालभिन्नाधिकरणे प्रतियोग्यसामानाधिकरण्यं विवक्षितम् । अतो नात्र दोष इति वाच्यम् । एवं सति काले सर्वाधिकरणत्वप्रतीतेः भ्रमत्वापातात् । सर्वाधिकरणत्वाभावस्य कालभिन्नाधिकरणे प्रतियोग्यसमानाधिकरणत्वात् ।

नच तथाप्यारोप्यसम्बन्धेन प्रतियोग्यसामानाधिकरण्यं विवक्षितम् । अतो नाप्रसिद्धिरिति वाच्यम् । एवं सति संयोगीति प्रतीतेः भ्रमत्वापातात् । संयोगस्यावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वे अपि आरोप्यसम्बन्धेन प्रतियोगिव्यधिकरणत्वात् । अग्रे संयोगीति प्रतीतेः भ्रमत्वाभावप्रसङ्गाच्च, संयोगाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् । नच क्वचित्प्रतियोग्यसमानाधिकरण्यमेव विवक्षितम् अतो नातिप्रसङ्ग इति वाच्यम् । एवं सति संयोगीति प्रतीतेः भ्रमत्वापत्तेः दुष्परिहारत्वात् । तस्माद्यवच्छे{दके}देन यत्र यन्नास्ति तदवच्छेदेन तद्विषयकत्वमेव भ्रमत्वं वाच्यम् । [तस्मात्] कालस्य सर्वाधारत्वे सर्वाधारत्वप्रतीतिभ्रान्त्यैवेति । तस्मात्कालस्य सर्वाधिकरणत्वं {संसर्गत्वेति} संसर्गविषयकत्वमेवेति प्राचां पक्षोऽदक्ष इति दिक् । कालस्य सर्वाधारताविचारः समाप्तः ॥